दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-113 | 1 | फरवरी 13, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणकृष्णैकादशी
फाल्गुण 01 प्रविष्ठांशः मङ्गलमयः भवेत्


2 "सर्वकारः शिक्षाक्षेत्रे कृत्रिमप्रज्ञायाः (AI) प्रयोगं प्रोत्साहयति: शिक्षामन्त्री धर्मेन्द्रप्रधानः"

3 HP Cabinet Decisions- १०६६ पदानां पूर्तये अनुमतिः, स्वसाधनसंग्रहं करिष्यति सर्वकारः

6 आधुनिकभारतदेशस्य निर्माणे स्वामीदयानन्दस्य योगदानम्


## विगतद्विवर्षयोः जम्मू-कश्मीरस्य कर्मचारी भविष्यनिधि-सङ्घटनायां (ई पी एफ् ओ) 1.6 लक्षतः अधिकाः नूतन-अभिदाताः योजिताः सन्ति

श्रम-वृत्यवसर-राज्यमन्त्री शोभा करन्दलजे: अवदत् यत् विगतद्विवर्षयोः जम्मू-कश्मीरस्य कर्मचारी भविष्यनिधि-सङ्घटनायां (ई पी एफ् ओ) 1.6 लक्षतः अधिकाः नूतन-अभिदाताः योजिताः सन्ति। जम्मू-कश्मीरस्य निरुद्योगस्य विषये राज्यसभायां प्रश्नोत्तरकाले उत्तरं ददन्ती मन्त्री अवदत् यत् देशे एम्. एस्. एम्. ई. इति क्षेत्रस्य औपचारिकतायै सर्वकारः कार्यं कुर्वन् अस्तीति ।

## सेवा-तीर्थेति भवन-सङ्कुलस्य अनावरणं करिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य राष्ट्रिय-राजधान्यां सेवा-तीर्थेति भवन-सङ्कुलस्य अनावरणं करिष्यति। ततः परं प्रधानमन्त्री औपचारिकरूपेण सेवा-तीर्थस्य अथ कर्तव्य-भवन-प्रथमद्वितीययोः उद्घाटनमपि करिष्यति, सायङ्काले च सेवा-तीर्थे सार्वजनिककार्यक्रमम् अपि सम्बोधयिष्यति।

## भारतं विद्युत्-अभाव-देशात् विद्युत्-अधिशेष-देशत्वेन अभवत्-येसो-नाइकः

ऊर्जा-राज्यमन्त्री श्रीपाद-येसो-नाइकः अवदत् यत् भारतं विद्युत्-अभाव-देशात् विद्युत्-अधिशेष-देशत्वेन अभवत्। लोकसभायां अद्य अनुपूरकप्रश्नानाम् उत्तरं ददता श्रीनाईकेन उक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे चतुर्दशाधिक द्विसहस्रतम वर्षादारभ्य विद्युत्क्षेत्रे अनेकानि परिष्काराणि कृतानि सन्ति।

## रक्षा-अधिग्रहण-परिषदा सार्धत्रिलक्षाधिककोटिरूप्यक-मूल्यस्य प्रस्तावाः स्वीकृताः

रक्षा-अधिग्रहण-परिषदा सशस्त्र-बलानां क्षमताभिवर्धनाय सार्धत्रिलक्षाधिक-कोटिरूप्यक-मूल्यस्य प्रस्तावाः स्वीकृताः। रक्षामन्त्रालयेन सूचितं यत् भारतीय वायुदलेन बहु-भूमिका-युक्त-युद्धविमानानां (MRFA) रफ़ेल्-विमानानां, युद्ध-क्षिपणिनां, वायु-नौकायान-आधारित-उच्च-ऊर्ध्वता-स्यूडो-उपग्रहस्य (AS-HAPS) क्रयणाय च आवश्यकतां स्वीकर्तुं (AON) अनुमतिः दत्तः इति।

## "बाङ्गलादेश-राष्ट्रवादी-दलम् (BNP) निर्वाचने जमात-ए-इस्लामी इत्यस्य उपरि अग्रतां सुदृढां अकरोत्"



बाङ्गलादेश-राष्ट्रवादी-दलं (BNP) स्वस्य पूर्वसहयोगिनः 'जमात-ए-इस्लामी' इत्यस्य उपरि स्वां श्रेष्ठतां अधिकं सुदृढां अकरोत्। अगस्त २०२४ तमे वर्षे अवामी-लीग-सर्वकारस्य पतनात् परं सत्तां गृहीतवत्याः अन्तरिम-सर्वकारस्य स्थाने अभवन्तः महत्त्वपूर्णानां सामान्यानां निर्वाचनानां मतगणना गुरुवासरे विलम्बरात्रौ यावत् प्रचलति स्म। अपदस्थ-प्रधानमन्त्रिण्याः शेख हसीनायाः अधुना भङ्गितायाः 'अवामी-लीग' संस्थायाः अनुपस्थितौ इदं निर्वाचनं बीएनपी (BNP) तथा जमात-ए-इस्लामी इत्यनयोः मध्ये साक्षात् स्पर्धा आसीत्। अर्धरात्रौ आगताः अनौपचारिकाः परिणामाः सङ्केतयन्ति यत् बीएनपी अधिकांशेषु निर्वाचनक्षेत्रेषु अग्रेसरं वर्तते। 'इत्तेफाक' इति समाचारपत्रेण संकलितानां अनौपचारिक-परिणामानां अनुसारम्, बीएनपी-दलेन १५८ आसनानि, जमात-दलेन ४१ तथा अन्यैः पञ्च (५) आसनानि जितानि। २९९ निर्वाचनक्षेत्राणां मध्ये २०४ क्षेत्रेषु मतगणना पूर्णा जाता अस्ति। विवरणानुसारं सङ्केतः अस्ति यत् बीएनपी-दलं निर्वाचनं जितवत्।

## आयव्ययके भारतस्य भावि भविष्यस्य आधारभूतसंरचनां च संवर्धनाय शिक्षादि विषयेषु बलं प्रदत्तम्-प्रधानमन्त्री



हिमसंस्कृतवार्ताः। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् वित्तमन्त्री निर्मला सीतारमणवर्या लोकसभायां स्वीयाभिभाषणे विषयेस्मिन् व्यापक-विवरणं प्रदत्तवती यत् अस्य वर्षस्य आय-व्ययकेन देशस्य आर्थिक क्षेत्रेषु कीदृशानि परिवर्तनानि आगमिष्यन्ति। लोकसभायाम् आय-व्ययके वित्तमन्त्रिणः प्रदत्तस्य उत्तरस्य वीडियो इति चलचित्रं सामाजिकान्तर्जालीय-पटले विनिमयी कुर्वन् श्रीमोदिना उक्तं यत् तया रिफॉर्म एक्सप्रेस इत्यस्मिन्, सूक्ष्म-लघु-मध्यम-उद्यमं, एम.एस.एम.ई. इति समर्थनं, कौशल विकासं, भारतस्य भावि भविष्यस्य आधारभूतसंरचनां च संवर्धनाय शिक्षादि विषयेषु बलं प्रदत्तम् ।

## विपक्षस्य नेता राहुलगान्धी, सदने तथ्यसाक्ष्ययोःरभावेऽपि वक्तव्यं करोतीति- प्रल्हादजोशी



केन्द्रीयमन्त्री प्रल्हादजोशी आरोपितवान् यत् लोकसभायां विपक्षस्य नेता राहुलगान्धी, सदने तथ्यसाक्ष्ययोरभावेऽपि वक्तव्यं करोतीति। संसद परिसरे वार्ताकारैः सह वार्तालापं कुर्वन् मन्त्री अवदत् यत् राहुलगान्धिनं विरुध्य विशेषाधिकार प्रस्ताव-विषये निर्णयः संसदीयकार्यमन्त्रालयाधीनः अस्तीति। सः अवदत् यत्, श्रीगान्धी, लोकसभायां, सभायाः बहिः वा अपरिपक्वरूपेण व्यवहरते। ह्यः संसदीयकार्यमन्त्री किरेन रिजीजूः अवदत् यत् आयव्ययिक-चर्चायाः समये लोकसभां भ्रामयितुं, आधाररहित-वक्तव्यकृतवतां विपक्षनेतृणां विरुद्धं भाजपेति दलं विशेषाधिकार प्रस्तावं आनयतीति।

## यूरोपीयसङ्घस्य सभाः

सप्तदशसदस्यीय-यूरोपीय-सङ्घस्य नेतारः बेल्जियम्-देशस्य षोडश शताब्द्याः आल्डेन् वैसेन्-दुर्गे समूहस्य भावि-कार्यनीतेः विषये चर्चा कर्तुं वर्धमान-वैश्विक समस्यानां मध्ये समागच्छन्ति।



## सुभाषितम्

**उपकर्तुं प्रियं वक्तुं,**
**कर्तुं स्नेहमनुत्तमम्।**
**सज्जनानां स्वभावोऽयं,**
**केनेन्दुः शिशिरीकृतः।।**

भावार्थ:- हमें अपने संपर्क में आने वाले व्यक्तियों की सहायता, उनसे प्रेमपूर्वक और स्नेहपूर्ण उत्तम व्यवहार करना चाहिए। सज्जन व्यक्तियों का व्यवहार भी ऐसा ही तथा चन्द्रमा की ज्योत्स्ना के समान सौम्य और शीतलता प्रदान करने वाला होता है।


दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263


सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## भारत-अमेरिका-देशयोर्मध्ये सञ्जातायाः अन्तरीम-व्यापार-सन्धेः प्रशंसाम् अकरोत् वस्त्रोद्योगः



वस्त्रोद्योगः भारत-अमेरिका-देशयोर्मध्ये सञ्जातायाः अन्तरीम-व्यापार-सन्धेः प्रशंसाम् अकरोत्। आलोक्-इण्डस्ट्रीज्-लिमिटेड् इत्यस्य निर्देशकः, रिलायन्स्-इण्डस्ट्रीस्-लिमिटेड् इत्यस्य अध्यक्षः अनिल-राजवंशी इत्येषश्च अवदताम् यत् अनया सन्ध्या भारत-अमेरिका-देशयोर्मध्ये व्यापारः वर्धयिष्यतीति। ताभ्यामुक्तं यत् अनेन व्यवहारेण वस्त्रक्षेत्रस्य सार्धचतुः कोट्यधिकाः जनाः उपकृताः भविष्यन्तीति।

## "सर्वकारः शिक्षाक्षेत्रे कृत्रिमप्रज्ञायाः (AI) प्रयोगं प्रोत्साहयति: शिक्षामन्त्री धर्मेन्द्रप्रधानः"



शिक्षामन्त्री धर्मेन्द्रप्रधानः उक्तवान् यत् सर्वकारः शिक्षाक्षेत्रे कृत्रिमप्रज्ञायाः (AI) प्रयोगं प्रोत्साहयति। देहल्यां 'भारतबोधन-एआई-सम्मेलन-२०२६' इत्यस्मिन् कार्यक्रमे सः अवदत् यत् भारतीयशिक्षाप्रणाल्यां कृत्रिमप्रज्ञायाः क्षेत्रे तीव्रगत्या कार्यं भवति, अस्य कृते देशे पर्याप्ताः युवाप्रतिभाः सन्ति।केन्द्रीयमन्त्री कथितवान् यत् भारतस्य शिक्षाप्रणाल्यां तृतीयकक्षातः उन्नतशोधस्तरं यावत् पाठ्यक्रमे कृत्रिमप्रज्ञा (AI) समाविष्टा भविष्यति। अपि च, एषा शोधविषयरूपेण, नवाचारस्य प्रतिमानरूपेण (Innovation Model), सञ्चाररणनीतिरूपेण च सम्मिलिता भविष्यति।

## राज्यसभायां पुनः केन्द्रीय-आयव्यय-संकल्पनेति विषये परिचर्चा



राज्यसभायां सत्रस्यास्य केन्द्रीय-आयव्यय-संकल्पनेति विषये परिचर्चा पुनः समारब्धा। चर्चायां भागम् गृह्णन् भाजपेति दलस्य नेता मदनराठोरः अवदत् यत् भारतस्य अर्थव्यवस्था विश्वस्य चतुर्थी बृहत्तमा अर्थव्यवस्था अभवदिति। सः अवदत् यत् मोबाईल इति जङ्गमदूरवाण्याः विनिर्माणक्षेत्रे भारतं अधुना विश्वस्य द्वितीयः बृहत्तमः उत्पादकः सञ्जातमस्ति। भाजपेति दलस्य शंभुशरण पटेलः केन्द्रीय-आयव्यय-पत्रं प्रशंसयन् उक्तवान् यत् एतत् देशवासिनां अपेक्षां पूरयिष्यतीति। पूर्व, केन्द्रीयमन्त्री डा. एल्. मुरुगनः सार्वजनिक-लेखोपक्रम-समित्यां सप्तसदस्यानां निर्वाचनस्य प्रस्तावं प्रेषितवान्, यद्धि ध्वनिमतेन स्वीकृतम्। एस. सी.एस. टी. इति कल्याणसमितेः दश-सदस्यानां निर्वाचनस्य प्रस्तावः अपि सभया स्वीकृतः। अनेनैव सह लोकसभायां औद्योगिक-सम्बन्ध-संहितायाः संशोधनात्मक- विधेयकमपि स्वीकृतम्, यस्योद्देश्यमस्ति पूर्वतन-श्रम-विधानानां निरन्तरतायाः विषये भविष्ये कस्याः अपि जटिलतायाः निवारणम् इति।

## "लोकसभा औद्योगिक-सम्बन्ध-संहिता (संशोधन) विधेयकम्, २०२६ पारितवती"



लोकसभा 'औद्योगिक-सम्बन्ध-संहिता (संशोधन) विधेयकम्, २०२६' पारितवती। एतद् विधेयकं 'औद्योगिक-सम्बन्ध-संहिता, २०२०' इत्यस्मिन् संशोधनं करोति। अस्य संशोधनस्य उद्देश्यं त्रयाणां नियमानाम्—'ट्रेड यूनियन अधिनियम, १९२६', 'औद्योगिक-रोजगार (स्थायी आदेश) अधिनियम, १९४६' तथा 'औद्योगिक-विवाद-अधिनियम, १९४७'—इत्येतेषां निरन्तरतां प्रति भविष्ये उत्पद्यमानानां जटिलानां निवारणम् अस्ति।चर्चायाः उत्तरं ददन् श्रम-रोजगारमन्त्री मनसुख-माण्डविया उक्तवान् यत् सप्तदश (१७) राष्ट्रिय-श्रम-सङ्गठनानि अकथयन् यत् एषा श्रमसंहिता श्रमिकाणां हिताय प्रवर्तिता अस्ति। सः अवदत् यत् कतिपयानि एव सङ्गठनानि अस्य नियमस्य विरोधं कृतवन्तः। श्री माण्डविया महोदयः कथितवान् यत् श्रमसंहिता वैधानिकसमर्थनेन सह न्यूनतमवेतनम् प्रयुनक्ति, कस्यापि राज्यस्य कृते निर्धारित-न्यूनतमवेतनात् न्यूनं वेतनं निश्चितुम् अनुमतिः न भविष्यति। सः उदीरयत् यत् एषा संहिता स्त्री-पुरुषाणां कृते समानवेतनस्य निश्चयं करोति तथा श्रमिकाणां कृते समये वेतनप्राप्तिं सुनिश्चितं करोति।तेन प्रोक्तं यत् श्रमसंहितायाः अन्तर्गतं चत्वारिंशत् (४०) वर्षेभ्यः अधिकवयस्कानां सर्वेषां श्रमिकाणां कृते वर्षे एकवारं अनिवार्य-स्वास्थ्य-परीक्षणं भविष्यति। एकस्य सर्वेक्षणस्य उल्लेखं कुर्वन् सः अवदत् यत् एते श्रम-नियमाः तृतीय-चतुर्थश्रेण्याः नगरेषु रोजगारस्य अवसराणां सृजने सहायकाः भविष्यन्ति। सः सूचितवान् यत् विगतैः एकादशभिः (११) वर्षैः देशे सामाजिक-सुरक्षायाः व्याप्तिः १९ प्रतिशततः ६४ प्रतिशतं यावत् वर्धिता अस्ति।पूर्वम्, चर्चायां भागं गृह्णन् कांग्रेस-दलस्य कोडिकुन्निल सुरेशः अवदत् यत् अनेन संशोधनेन कोऽपि सुधारः न जातः। सः आरोपं कृतवान् यत् युवासु बेरोजगारी-दरः अतीव उच्चः अस्ति, सर्वकारश्च रोजगार-संरक्षणस्य प्रबन्धीकरणस्य स्थाने तत् दुर्बलीकरोति।अपरपक्षे भाजपा-सांसदः दर्शन सिंह चौधरी अवदत् यत् एतद् विधेयकं श्रमिकाणां हितानां रक्षां करोति तथा उद्योगेषु 'ईज ऑफ डूइंग बिजनेस' (व्यापार-सुगमतां) प्रोत्साहयति।

## अष्टादश दिनाङ्कादारभ्य फरवरीमासस्य द्वाविंशतिः दिनाङ्कपर्यन्तं भारतस्य राजकीय-यात्रायां भविष्यति ब्रज़िल्-देशस्य राष्ट्रपतिः



ब्रज़िल्-देशस्य राष्ट्रपतिः लूईज इनासियो लुला डा सिल्वा नवदिल्ल्यां आगामि इंडिया-ए. आई. इंपैक्ट इति शिखरसम्मेलनाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः आमन्त्रणे अस्मिन् मासे अष्टादश दिनाङ्कादारभ्य फरवरीमासस्य द्वाविंशतिः दिनाङ्कपर्यन्तं भारतस्य राजकीययात्रायां भविष्यति। राष्ट्रिय-राजधान्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् श्री लूला डा सिल्वा वर्येण सह नैके मन्त्रिणः वाणिज्यप्रतिनिधयः च भविष्यन्ति। फरवरी मासस्य एकविंशति दिनाङ्के द्वैपाक्षिकं वार्तालापं भविष्यति, तस्य आतिथ्यं राष्ट्रपति पदासीनया द्रौपदी मुर्मू वर्यया क्रियते इति सः अवदत्। सः अवदत् यत् फ्रान्स-देशस्य राष्ट्रपतिः इम्मैनुयल मैक्रो अपि शिखरसम्मेलनाय त्रिदिवसीया आधिकारिकयात्रायां भविष्यति इति।

## "सीबीएसई द्वादश-कक्षायाः उत्तरपुस्तिकानां मूल्याङ्कनाय 'ऑन-स्क्रीन मार्किंग' इति पद्धतिं प्रवर्तयिष्यति"




केन्द्रीय-माध्यमिक-शिक्षा-बोर्डः (CBSE) अस्मात् वर्षात् द्वादश-कक्षायाः उत्तरपुस्तिकानां मूल्याङ्कनाय 'ऑन-स्क्रीन मार्किंग' (पटल-आधारित-अङ्कनम्) पद्धतिं प्रयुङ्क्ते। तथापि, दशम-कक्षायाः उत्तरपुस्तिकानां मूल्याङ्कनं पूर्ववत् भौतिकरूपेण (Physical evaluation) एव भविष्यति।सीबीएसई-परीक्षा-नियन्त्रकः संयम भारद्वाजः सूचितवान् यत् बोर्डः कार्यदक्षतां पारदर्शितां च वर्धयितुं अस्मिन् वर्षे द्वादश-कक्षायाः कृते एतत् निर्णयं स्वीकृतवान्। अपि च, बोर्ड-द्वारा अस्मात् वर्षात् दशम-कक्षायाः कृते 'द्वितीय-बोर्ड-परीक्षा' आयोजयितुं घोषणा कृता। एषा परीक्षा तेषां छात्राणां कृते वैकल्पिकी भविष्यति ये स्व-प्रदर्शने परिष्कारं कर्तुम् इच्छन्ति।बोर्डः अवदत् यत् अद्य प्रातः एकादश (११) वादने परीक्षा-सञ्चालनस्य तथा 'ऑन-स्क्रीन मार्किंग' इत्यस्य मार्गनिर्देशान् स्पष्टयितुं एकस्य 'लाइव वेबकास्ट' (सजीव-जालप्रसारणस्य) आयोजनं करिष्यति।

## "राष्ट्रपतिः उपराष्ट्रपतिः च स्वामी-दयानन्द-सरस्वती-महोदयं तस्य जयन्त्यां श्रद्धामञ्जलिं समर्पितवन्तौ"

"राष्ट्रपतिः द्रौपदी मुर्मु, उपराष्ट्रपतिः सी.पी. राधाकृष्णनः च स्वामी-दयानन्द-सरस्वती-महोदयं तस्य जयन्त्यां श्रद्धामञ्जलिं समर्पितवन्तौ"सामाजिक-माध्यमेन (Social Media) राष्ट्रपतिः द्रौपदी मुर्मु अकथयत् यत् स्वामी दयानन्द सरस्वती सम्पूर्णसमाजाय देशस्य शिक्षाप्रणाल्यै च अमूल्यं मार्गदर्शनं दत्तवान्। राष्ट्रपतिः उक्तवती यत् तेन स्थापिताभ्यः आध्यात्मिक-शैक्षणिक-संस्थाभ्यः देशः सदैव लाभान्वितः अभवत्, भविष्यति च।उपराष्ट्रपतिः सी.पी. राधाकृष्णनः अवदत् यत् महर्षिः दयानन्द सरस्वती स्वकीयं सम्पूर्णं जीवनं अन्धविश्वासस्य, आडम्बरस्य, सामाजिक-कुरीतीनां च विरुद्धं सङ्घर्षे समर्पितवान्। उपराष्ट्रपतिः कथितवान् यत् शिक्षायाः प्रसारे, महिला-सशक्तीकरणे, भारतीयसंस्कृतेः संरक्षणे च तस्य प्रयत्नाः देशाय एकां नवीनां वैचारिकीं दिशं आत्मसम्मानस्य भावं च दत्तवन्तः।श्री राधाकृष्णनः अदीधरत् यत् वर्गहीन-जातिविहीन-समतावादि-समाजस्य स्थापनायां तथा उच्च-नैतिक-मूल्यानां प्रसारे तस्य योगदानम् अद्यापि सर्वेषां कृते प्रेरणायाः स्रोतः अस्ति।



# HP Cabinet Decisions- १०६६ पदानां पूर्तये अनुमतिः, स्वसाधनसंग्रहं करिष्यति सर्वकारः



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशस्य मंत्रिमण्डलस्य सभा गुरुवासरे मुख्यमंत्रिणः सुखविन्द्रसिंहसुक्खु महोदयस्य अध्यक्षतायां सम्पन्ना। अस्यां सभायां बहवः महत्त्वपूर्णाः निर्णयाः स्वीकृताः। मंत्रिमण्डलेन विविधेषु विभागेषु विभिन्नवर्गीयानां १०६६ पदानां सृजनं तथा पूर्तिः अनुमोदिता। आरडीजी-निरोधेन जातायाः स्थितेः अपि पुरातन- पेंशन- योजना अविच्छिन्नरूपेण प्रवर्तयितुं निर्णयः कृतः। सर्वेषु विभागेषु नियुक्तिप्रक्रिया प्रवर्तिष्यते।मंत्रिणौ हर्षवर्धन चौहान- रोहित ठाकुर इत्येतौ निर्णयानां विवरणं दत्त्वा उक्तवन्तौ यत् आरडीजी- निरोधः हिमाचलस्य विकासाय महत् आघातं जनयति, एषः अन्यायः इति। सरकारः स्वसाधनसंग्रहं कृत्वा विकासगतिं न अवरुद्धां करिष्यति। गतत्रिवर्षेषु प्रायः सार्धत्रिसहस्र- कोटिरूप्यकाणां राजस्वम् अर्जितम् इति उक्तम्। महिला- होमगार्ड- कारिणीभ्यः २६ सप्ताहपर्यन्तं मातृत्व- अवकाशः दास्यते। आगामिनि विधानसभायाः बजटसत्रे राज्यपालस्य अभिभाषणम् अपि अनुमोदितम्।

## मार्गशुल्कं प्राचीराः, आबकारी-नीतिः च अनुमोदिताः; 'सुख-शिक्षा-योजनायां संशोधनम्

मंत्रिमण्डलेन २०२६-२७ वर्षस्य मार्गशुल्कम् प्राराचीर-व्यवस्था तथा आबकारी-नीतिः स्वीकृता। इन्दिरागान्धी- सुख- शिक्षा- योजनायां संशोधनं कृत्वा विधवानां दुहितृभ्यः राज्ये बहिः च स्थितेषु शासकीयसंस्थासु व्यावसायिक- पाठ्यक्रम- अध्ययनार्थं वित्तीयसाहाय्यं प्रदास्यते। छात्रावास- सुविधाया अभावे प्रतिमासं ३००० रूप्यकसमानं भृत्यर्थ- साहाय्यं दास्यते।

## 'इन्दिरागान्धी- मातृ- शिशु- संकल्पयोजना' आरभ्यते; दिव्याङ्गजनानां विवाह-अनुदानवृद्धिः

षड्वर्षात् अधस्तात् बालकानां, गर्भवतीनां, धात्रीमातृणां च पोषण-स्तर-वृद्ध्यर्थं उन्नत- पूरक- पोषणव्यवस्था प्रदास्यते। ७० प्रतिशताधिक- दिव्याङ्गतायुक्तानां विवाहसाहाय्यं ५०,००० रूप्यकात् २,००,००० रूप्यकपर्यन्तं वर्धितम्। ४०-७० प्रतिशत-दिव्याङ्गतायुक्तानां २५,००० रूप्यक-अनुदानं प्रदास्यते।

## सीबीएसई-विद्यालयेषु ६०० पदानि; ३१ विद्यालयाः सहशिक्षालयत्वेन परिवर्तिताः

प्रस्तावित- सीबीएसई- विद्यालयेषु संस्कृत, शारीरिकशिक्षा, संगीत तथा चित्रकला-शिक्षकानां प्रत्येकं १५० पदानि, आहत्य ६०० पदानि सृज्य राज्य- चयन- आयोगेन पूर्यन्ते। राज्ये ३१ बालक- बालिका- विद्यालयाः सह-शिक्षालयत्वेन एकीकृताः।

## चिकित्सा-संस्थाः आधुनिकीक्रियन्ते

चिकित्सा- महाविद्यालयानां, सुपर- विशेषता- अस्पतालानां, आदर्श- स्वास्थ्य- संस्थानानां च आधुनिकीकरणाय १६१७.४० कोटिरूप्यक- परियोजना अनुमोदिता। क्एतस्य लक्ष्यं गुणवत्तायुक्त- स्वास्थ्यसेवा- सुदृढीकरणम्। कमलानेहरू- चिकित्सालय- शिमला, सुंदरनगर- नूरपुर- नागरिक- चिकित्सालयाः, ऊना- भोरंज- क्षेत्रीय- चिकित्सालयाः, बिलासपुर- जनस्वास्थ्य- प्रयोगशाला च आधुनिक- उपकरणैः सुसज्जीकृताः भविष्यन्ति।

## नाहन- चिकित्सा- महाविद्यालये नवीन- विभाग- द्वयम्

डॉ. वाई. एस. परमार- राजकीय- चिकित्सा- महाविद्यालय- नाहने इम्यूनोहेमेटोलॉजी- रक्तसञ्चारविभागः स्थापितः। सर्वेषु सार्वजनिक- स्वास्थ्यसंस्थासु जैव- चिकित्सोपकरण- प्रबन्धन- कार्यक्रमः अपि प्रवर्तिष्यते।

## विविध-पदानां पूर्तिः

कनिष्ठ-अभियन्ता (सिविल) १९०, कनिष्ठ- कार्यालय- सहायक (आईटी) १५१, फार्मेसी- अधिकारी ४०, सहायक- स्टाफ नर्स १५०, रेडियोग्राफर ३०, खाद्य- सुरक्षा-अधिकारी १०, औषधि- परीक्षण- प्रयोगशाला- पदानि ३६, उच्च- न्यायालय- रजिस्ट्री- शुचिकर्मचारी ८, सैनिक- कल्याण- विभागे ५, राजस्व- विभागे ३ पदानि च पूर्यन्ते।

## ७७७ विद्यालयेषु डिजिटल-कक्षाः

अतिरिक्तेषु ७७७ विद्यालयेषु डिजिटल- कक्षा- परियोजना प्रवर्तिष्यते। सिरमौरे लोकनिर्माण- विभाग- मण्डलानां पुनर्गठनं कृतम्। कोटखाई- पशु- चिकित्सालयः उपमण्डलीय-स्तरे उन्नीयते।

## राजमार्ग-निकासी-नीतिः, क्रीडा-विकासः च

सड़क-निकासी-नीतिः स्वीकृता, येन मार्ग- सुदृढता, जीवन-चक्रव्यय-न्यूनता, सुरक्षा-वृद्धिः च सुनिश्चिता भविष्यति। लुहणू- क्रीडा- छात्रावासस्य शय्याक्षमता ८० तः १०० पर्यन्तं वर्धिता। चम्बायां वैश्विक- कौशल- डिजिटल- विश्वविद्यालय- स्थापनाय निर्णयः कृतः। राज्य- लॉटरी- नियम- २०२६ प्रारूपनिर्माणाय उपसमितिः गठिता। चौपाल, शिलाई, जुब्बल, मोरसिंघी इत्यादिषु क्रीडा-छात्रावास-स्थापनाय च अनुमतिः दत्ता।

# हिमाचले अपि विविधानां सङ्घटनानां कार्यावरोधः

## विरोधप्रदर्शनानि च, 'सीटू' (CITU) ध्वजच्छायायां एकत्रिताः जनाः



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।
केन्द्रसर्वकारेण सार्वजनिकक्षेत्रस्य उपक्रमाणां विक्रयणस्य तथा च नूतनश्रमसंहितायाः (Labour Code) विरुद्धं गुरुवासरे राष्ट्रव्यापी- आन्दोलनस्य प्रभावः हिमाचलप्रदेशे अपि दृश्यते। राजधान्यां शिमलायां 'सीटू' ध्वजच्छायायां विरोधप्रदर्शनम् अभवत्। अस्मिन् विरोधे 'पञ्चायत भवनतः आरभ्य सीटीओ (CTO) पर्यन्तं विरोधयात्रा (Rally) निर्गता।

## ऊनायाम् आक्रोशः-

ऊनानगरस्य 'एमसी' उद्याने विविधाः कर्मचारीसङ्घाः एकत्रिताः भूत्वा कर्मचारीविरोधिनीतीनां विरुद्धं केन्द्रसर्वकारं प्रति तीव्रं घोषणां कृतवन्तः। सर्वाणि सङ्घटनानि एकीभूय कर्मचारीविरोधि-निर्णयान् प्रतिहर्तुं केन्द्रसर्वकारं प्रति आह्वानं कृतवन्तः।

## बिलासपुरस्य मण्डलमख्यालये 'मिड-डे-मील' कार्यकर्तॄणां विरोध-प्रदर्शनम्

'एटक' (AITUC) सम्बद्ध-मिड-डे-मील वर्कर्स यूनियन इत्यनेन केन्द्र-प्रदेशसर्वकारयोः नीतीनां विरुद्धं युद्धं घोषितम्। राज्य- अध्यक्षा कमलेशठाकुर महोदया उक्तवती यत् वर्षाणि यावत् अल्पमानदेये कार्यं कुर्वतां कर्मकराणां उपेक्षा क्रियते।

## सोलनः ट्रेड-यूनियन-पक्षतः विरोधयात्रा

'एटक' इत्यस्य 'भारत-बन्द' आह्वानस्य प्रभावेण सोलननगरस्य मालरोडक्षेत्रे विविधाः ट्रेड- यूनियन- विरोधयात्राम् अकुर्वन्। अस्यां यात्रायां शूलिनी- ऑटो- यूनियन, बैंककर्मिणः, नगरनिगम- स्वच्छता- कर्मिणः च केन्द्रसर्वकारस्य एकाधिकार- नीतीनां विरुद्धम् आक्रोशं प्रकटितवन्तः।

# कुल्लौ १०८ तथा १०२ सेवाकर्मिणां कार्यावरोधः, रुग्णवाहिकानां (Ambulance) चक्राणि स्थगितानि

स्व-अभ्यर्थनानां कृते १०८ तथा १०२ सेवाकर्मिणः आन्दोलनं कृतवन्तः, येन कुल्लू-मण्डले रुग्णवाहिकानां प्रचालनं बाधितं जातम्। यद्यपि स्वास्थ्यविभागेन अन्याः चालकाः नियुक्ताः, तथापि रोगिणः अतीव कष्टं सोढवन्तः।

## सिरमौरः नाहननगरे राजमार्गेषु अवतीर्णाः कर्मकराः

सिरमौरस्य नाहन-नगरे 'सीटू' आह्वानस्य प्रभावेण कर्मकराः रोषयात्राम् अकुर्वन्। एषा यात्रा बस- स्थानकतः उपायुक्त-कार्यालयं (DC Office) यावत् अभवत्।

## मण्ड्यां चतुर्णाम् श्रमसंहितानां विरुद्धं मार्गेषु अवतीर्णाः कृषक-मजदूर-सङ्घटनानि

मण्डी-मण्डले मेडिकल-रिप्रेजेंटेटिव- यूनियन तथा 'सीटू' इत्यस्य नेतृत्वे विशालं प्रदर्शनं जातम्। राजेशशर्मा महोदयः अवदत् यत् चतस्रः श्रमसंहिताः श्रमिकाणां कृते अतीव विघातकाः सन्ति। श्रमिकाणां न्यूनतमवेतनं ३०,००० रूप्यकाणि भवेत् तथा च आंगनवाडी- मिड- डे- मील कर्मकराणां नियमितीकरणं भवेत्।

## रामपुरबुशहरे राकेश सिङ्घा महोदयस्य नेतृत्वे प्रदर्शनम्

रामपुरे 'सीटू' तथा 'अखिल भारतीय किसान सभा' इत्यस्य संयुक्ततत्त्वावधाने विशालं प्रदर्शनं विहितम्। हिमाचल- किसान- सभायाः राज्यमहासचिवः राकेश सिङ्घा महोदयः अवदत् यत् २१ नवम्बर २०२५ दिनाङ्के श्रमसंहितानां अधिसूचनां निर्गत्य मोदी-सर्वकारेण श्रमिकाः निःशस्त्राः कृताः। एताः संहिताः अन्तराष्ट्रिय- श्रम- मानदण्डानां उल्लङ्घनं कुर्वन्ति।

## चनौरविद्यालये पाचिकायाः उपरि तीक्ष्णास्त्रैः प्रहारः, महिलायाः मृत्युः

डाडासीबा शिक्षाखण्डान्तर्गतं चनौरविद्यालये मिड-डे मीलकार्यकर्तुः पाचिकायाः उपरि एकेन स्थानीयजनेन तीक्ष्णास्त्रैः प्रहारः कृतः येन महिलायाः मृत्युः अभवत्। स्थानीयजनानानुसारं ऋणसम्बन्धितः विषयः आसीत्। व्यक्तिना प्राथमिक-विद्यालये गत्वा छात्राणामुपस्थितौ तीक्ष्णास्त्रैः महिलायाः ग्रीवायाम् प्रहारः कृतः। सा महिला तत्क्षणमेव मृत्युमुपगता।

# शिल्पकॉर्न- विश्वविद्यालये निनदिष्यते देववाणी थाईलैंडदेशे संस्कृतस्य शङ्खनादः,





## भारत- थाईलैंडसम्बन्धेषु शिक्षायाः 'स्वर्णिमाध्यायः' प्रारभ्यते

हिमसंस्कृतवार्ताः- नवदेहली।
केन्द्रीय- संस्कृत- विश्वविद्यालयस्य (सी. एस. यु.) कुलपतिः प्रो. श्रीनिवासवरखेड़ी महोदयः, कुलसचिवः प्रो. आर. जी. मुरलीकृष्ण-महोदयः थाईलैंडदेशस्य बैंकॉक-नगरं प्रति कृतयात्रायाः अवसरे शिल्पकॉर्न-विश्वविद्यालये स्थापितं संस्कृत- अध्ययन- केंद्रम् (SSC) केन्द्रीय- संस्कृत- विश्वविद्यालयस्य विदेशकेन्द्ररूपेण विकसितुं महत्वपूर्णा सहमतिः अभवत्। अस्यां दिशि सहमति- ज्ञापनस्य (MoU) माध्यमेन औपचारिकीकरण- प्रक्रिया शीघ्रमेव आरभ्यते इति निर्णीतम्।
उल्लेखनीयं यत् पूर्वं विदेशमन्त्रिणि पदे विराजमानायाः स्वर्गीयायाः सुषमास्वराज- महाभागायाः कार्यकाले शिल्पकॉर्न-विश्वविद्यालये संस्कृत- अध्ययन- केन्द्रस्य स्थापना अभवत्। अद्यतनः प्रयासः तस्यैव दूरदर्शिन्याः योजनायाः संस्थागतरूपेण सुदृढीकरणस्य महत्त्वपूर्णं पदम् अस्ति। एषः उपक्रमः केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानमहोदयस्य नेतृत्वे विदेशेषु संस्कृत-भारतीयज्ञानपरम्परयोः प्रसार-नीतिम् अधिकं सशक्तयिष्यति।

### भारत-थाईलैंड-सभ्यतासम्बन्धेषु नूतना ऊर्जा

भारत-थाईलैंडयोः मध्ये संस्कृत- पालि- बौद्धपरम्पराधिष्ठिताः सहस्राब्दिपुरातनाः सांस्कृतिक- सम्बन्धाः सन्ति। ३ अप्रैल् २०२५ दिनाङ्के भारतस्य माननीयप्रधानमन्त्री नरेन्द्रमोदी- महोदयेन थाईलैंडयात्राकाले उक्तं- "भारतं थाईलैंडश्च केवलं राजनयिक-सहभागिनौ न स्तः, अपि तु आध्यात्मिक-समीपवर्तिनौ स्तः" इति वचनम् अस्य आरम्भस्य पृष्ठभूमिं दृढीकरोति। विशेषज्ञानां मते थाई-भाषायां षष्टिशताधिक- प्रतिशतं संस्कृत-पालि-मूलकशब्दानां व्यापक- उपस्थितिः उभयदेशयोः परस्पर- परम्परां प्रमाणयति।

### शैक्षणिक-सहयोगस्य प्रमुख-आयामाः

उभयोः विश्वविद्यालययोः मध्ये अधोलिखितेषु विषयेषु सहमतिः अभवत्-
१. संकाय-छात्र-विनिमय-कार्यक्रमाः- संयुक्त- शिक्षणं, अनुसंधानं तथा सांस्कृतिक- आदान- प्रदानस्य संस्थागत-रूपेण संवर्धनम्।
२. दूरस्थ-शिक्षा-उपक्रमः- थाईलैंड- आसियान-देशीय- विद्यार्थिभ्यः संस्कृत- पालि- हिन्दी- भारतीयज्ञानप्रणाली-आधारित-ऑनलाइन-पाठ्यक्रमाणां प्रावर्तनम्।
३. संयुक्त- उपाधि- कार्यक्रमाः- विद्यार्थिभ्यः भारत-थाईलैंडयोः उभयत्र अध्ययनस्य अवसरः।
४. स्नातकोत्तर-शोधसहयोगः- रामायण- अध्ययनम्, संस्कृत-अभिलेखविज्ञानम्, बौद्ध- अध्ययनम् इत्यादिषु विशेष-पाठ्यक्रमाः, संयुक्त- पीएच. डी. सह-मार्गदर्शनम् च। तथैव योगविज्ञानम्, वास्तुशास्त्रम्, ज्योतिषम्, ब्राह्मी लिपिः, पालि-बौद्ध-अध्ययनम् इत्यादिषु संयुक्त- संगोष्ठी- कार्यशाला- प्रकाशनयोजनाः अपि निर्मिताः।

### डिजिटल-संरक्षणं आधुनिक-प्रौद्योगिकी च

प्रस्तावितकेन्द्रे डिजिटल- संस्कृत- पारिस्थितिकी-तंत्रम् विकसितं भविष्यति। तत्र पालि- प्राकृत-पाण्डुलिपीनां डिजिटलीकरणम्, ई- संसाधन-निर्माणम्, संयुक्त- शोध- प्रकाशन- प्रोत्साहनं च क्रियते।

### थाईलैंडस्थित- भारतीय- दूतावासस्य सहभागिता

यात्राकाले थाईलैंडस्थिते भारतीयदूतावासे पौलोमी त्रिपाठी- महोदया (उप-मिशन-प्रमुखा तथा यूनेस्को-स्थायी- उप- प्रतिनिधिः) सह समागमः अभवत्। तेन प्रस्तावित-सहमतौ संस्थागत- समर्थनम्, संकायविनिमयः, छात्रवृत्ति-सुविधा, संस्कृत- विकास-योजना- अन्तर्गत- पुस्तक- प्रदानम् तथा शैक्षणिक-सहयोगस्य संवर्धनम् इत्यादिषु मंथनं कृतम्। दूतावासस्य समन्वयेन शिल्पकॉर्न- विश्वविद्यालयपरिसरे भारत-अध्ययन- तथा- संस्कृत- संसाधन- केन्द्र- स्थापनायाः प्रक्रियायाम् अपि सकारात्मक-चर्चा अभवत्।एतेन सह थाईलैंडस्य अन्येषु विश्वविद्यालयेषु अपि संस्कृत-पाठ्यक्रम- प्रारम्भाय प्रस्तावः प्रस्तुतः। एषः आरम्भः दक्षिण-पूर्व-एशिया-प्रदेशे संस्कृत- पालि- बौद्ध-अध्ययनस्य विस्तारस्य आधारशिला भविष्यति तथा उभयदेशयोः मध्ये शिक्षाक्षेत्रे 'स्वर्णिमाध्यायः' उद्घाटयिष्यति।

### महिदोल- विश्वविद्यालयस्य महामकुट- बौद्ध- विश्वविद्यालयस्य च शैक्षणिक-संवादः

कुलपतिः प्रो. वरखेड़ी-महोदयः महिदोल-विश्वविद्यालयस्य रिसर्च इन्स्टिट्यूट फॉर लैंग्वेज एण्ड कल्चर ऑफ एशिया अन्तर्गत- भारत- अध्ययन- केन्द्रम् अपि अवलोकितवान्। तत्र संस्कृत-पालि-भारतीय-इतिहास-विषयक-शोधकार्याणां समीक्षा कृता, संयुक्त- शोध- परियोजना- सेमिनार- प्रशिक्षण- कार्यक्रम- शैक्षणिक- संवाद- आयोजनं च चर्चितम्। महामकुट- बौद्ध- विश्वविद्यालयेन सह संभावित- शैक्षणिक-सहयोगस्य विविध-आयामाः विस्तरेण विवेचिताः। अध्ययन-सुदृढीकरणम्, भिक्षु- विद्यार्थिनां कृते संकाय- विनिमय- कार्यक्रमाः, अल्पकालिक- दीर्घकालिक- प्रमाणपत्र- डिप्लोमा- पाठ्यक्रमाः, संयुक्त-शोध-परियोजनाः इत्यादिषु विचारविमर्शः अभवत्। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य पक्षतः संस्कृत- पालि- प्राकृत- भाषाणाम् उन्नत-अध्ययनार्थं विशेषज्ञ- संकाय- प्रेषणस्य प्रस्तावः प्रस्तुतः। संस्कृत- पालि- सम्भाषण- शिविर- आयोजनम् तथा प्रकाशन-सहयोगः अपि स्वीकृतः।
अस्मिन् अवसरि निम्नलिखिताः विद्वांसः उपस्थिताः आसन्- असिस्टेण्ट- प्रोफेसर डॉ. दमरोंगफोन इंचन (पुरातत्व- संकाय- अधिष्ठाता, शिल्पकॉर्न- विश्वविद्यालयः),
असिस्टेण्ट- प्रोफेसर डॉ. चिरापत- प्रपण्डविद्य (पद्मश्री), डॉ. वुत्तिफोंग- थविन्सोंबाट (प्रबंध- निदेशकः, SSC), असिस्टेण्ट- प्रोफेसर डॉ. सोमबत- मंगमीसुखसिरी (पूर्व-प्रबंध-निदेशकः, SSC), प्रो. अमरजीव लोचनः, प्रो. प्रवृद्ध- नवाजीरामेथी- सुखोनतवारनोन (उपाध्यक्षः, अनुसंधान- शैक्षणिक- सेवाः), एसोसिएट- प्रोफेसरश्च डॉ. सुविन रुकसत (उपाध्यक्षः, अध्यक्ष- कार्यालयः, महामकुट- बौद्ध- विश्वविद्यालयः), प्रपरियत्तिवजीराकावी (अधिष्ठाता, मानविकी- संकायः), डॉ. चेतनीतिपथ प्रोमचिन (प्रधानः, स्नातकविद्यालयः), प्रमहा- क्रिएंगक्राई- सिरिवद्धनो (विभागाध्यक्षः, पाश्चात्य- भाषाविभागः), डॉ. चंपुनुच चांगचारोएन, प्रो. नारायण सिंहा, अन्तर्राष्ट्रीय- सहयोग- वृत्त- कार्यालय- समन्वयकः डॉ. रमणमिश्रः, डॉ. अनिलकुमारः च। एवम् एषः ऐतिहासिकः उपक्रमः भारत-थाईलैंडयोः शैक्षणिक- सांस्कृतिक- आध्यात्मिक- सम्बन्धान् नूतन- ऊर्जया समन्वितान् करिष्यति।

# १४ फरवरी दिनाङ्के हिमाचल-भ्रमणाय आगमिष्यति केन्द्रीय-मन्त्री जे. पी. नड्डा

हिमसंस्कृतवार्ताः- बिलासपुरम्। भारतीयजनतापक्षस्य पूर्वराष्ट्रियाध्यक्षाः तथा च केन्द्रीयस्वास्थ्य- परिवारकल्याण- रसायन- उर्वरकमन्त्रिणः जगतप्रकाशनड्डा महोदयः १४ फरवरी दिनाङ्के हिमाचलप्रदेशस्य द्विदवसीयभ्रमणाय आगच्छन्तः सन्ति। एषा सूचना भाजपा- प्रदेश- सह- मीडिया-प्रभारी स्वदेशठाकुर महोदयेन दत्ता।
तेन संसूचितं यत् जे. पी. नड्डा महोदयः १४ फरवरी दिनाङ्के सायंकाले ४:३० वादने वायुमार्गेण बिलासपुरस्य लुहणू हेलीपैड स्थानं प्राप्स्यति, यत्र तस्य भव्यं स्वागतं करिष्यते। तदनन्तरं नड्डामहोदयः स्वकीयं पैतृकग्रामं विजयपुरं प्रति प्रस्थास्यति, तत्रैव च रात्रिवासं करिष्यन्ति। १५ फरवरी दिनाङ्के प्रातः ९ वादने ते विजयपुरतः ठाकुररामसिंह- इतिहास- शोध- संस्थानम् ('ठाकुररामसिंहः हिस्टोरिकल रिसर्च इंस्टीट्यूट') नेरी (हमीरपुरम्) इत्यत्र गमिष्यन्ति, यत्र ते एकस्मिन् विशिष्टोपवेशने भागं ग्रहीष्यन्ति। उपवेशनान्तरं जे. पी. नड्डा महोदयाः पुनः सायंकाले चतुर्वादने बिलासपुरं प्रत्यागमिष्यति।

# वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते
**काव्या-** नमस्ते नन्दिनि। बेङ्गलूरु-नगरे सप्तति- सहस्र-रूप्यकाणां भाटक-मूल्यं दृष्ट्वा लुब्ना-नाम्नी काचित् महिला विस्मिता जाता। "कथम् ईदृशं मूल्यम्" इति तया पृष्टम्।
**नन्दिनी-** सत्यम्, तद् अतीव महार्घम्। इदानीम् एतत् कौतुकं श्रूयताम्। उत्तरप्रदेशे कन्दुक- क्रीडा- स्पर्धायां पुरस्काररूपेण कुक्कुटः प्रदत्तः, न तु धनम्।
**काव्या-** कुक्कुटः? तद् विचित्रं खलु! अन्यद् अपि शृणु। नार्वेदेशीयः कश्चित् क्रीडकः पदकं प्राप्तवान् अस्ति। किन्तु अनन्तरं "मया प्रेयसी वञ्चिता" इति दूरदर्शने तेन अङ्गीकृतम्।
**नन्दिनी-** तेन शोभनं न कृतम्। अस्तु, अद्य 'आलिङ्गनदिवसः' वर्तते। आलिङ्गनेन मानसी व्यथा दूरीकृता भवति।
**काव्या-** तर्हि वाचकैः अपि स्नेहेन आलिङ्गनं करणीयम्। नमो नमः।

# कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयेन "भारतीयं मनोविज्ञानम्" इति विषयमाधृत्य एकदिवसीया राष्ट्रीय संगोष्ठी आयोज्यते



**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे नागपुरम्।** कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयस्य संस्कृतभाषा–साहित्यविभागेन "भारतीयं मनोविज्ञानम्" इति विषयम् आश्रित्य दिनाङ्के १३ फेब्रुवरी २०२६ तमे रामटेक–नगरे एकदिवसीया राष्ट्रीय संगोष्ठी आयोज्यते। भारतीयस्य मनोविज्ञानस्य मूलधाराः पातञ्जल–योगदर्शने योगवासिष्ठग्रन्थे च स्पष्टतया दृश्यन्ते। आधुनिकस्य मनोविज्ञानस्य मूलानि अपि भारतीयेषु उपनिषत्सु दर्शनग्रन्थेषु च निहितानि सन्ति। अस्य विषयस्य समकालीनप्रासङ्गिकता, स्वरूपम्, प्रयोगात्मकता तथा लाभान् सम्यगवगन्तुं एषा एकदिवसीया संगोष्ठी अत्यन्तं महत्वपूर्णा सिद्धा भविष्यति। अस्याः संगोष्ठ्याः कृते केन्द्रीय–संस्कृत–विश्वविद्यालयात्, नवी–दिल्ली–नगरे स्थितात्, अनुदानं प्राप्तम् अस्ति। संगोष्ठ्याः उद्घाटनसमारोहस्य अध्यक्षता माननीयः कुलगुरुः डा. अतुल वैद्यः करिष्यति। मुख्यातिथिरूपेण प्रख्यातः संस्कृतविद्वान् महाकविः च प्रो. मधुसूदनः पेन्ना, हैदराबादस्थितायाः संस्कृत–अकादेम्याः निदेशकः, उपस्थितः भविष्यति। सारस्वतातिथिरूपेण युवा संस्कृतविद्वान् डॉ.दिनेशः रसालः, पुणे–विश्वविद्यालयस्य संस्कृत–प्राकृत–विभागस्य प्राध्यापकः, तथा विशेषातिथिरूपेण वेदविद्या–संकायस्य अधिष्ठाता प्रो. हरेकृष्णः अगस्ती उपस्थितौ भविष्यतः। कार्यक्रमे कुलसचिवः डॉ.रोशनः अलोने अपि आमन्त्रकरूपेण उपस्थितः भविष्यति। संगोष्ठ्याः संयोजिका प्रो. कविता होले, समन्वयकः प्रो. परागः जोशी, सह–समन्वयिका डा. श्वेता शर्मा च विशेषतया मंचासीनाः भविष्यन्ति।उद्घाटनानन्तरं एकं विशेषं संवादसत्रम् आयोजितं भविष्यति। तत्र डॉ.दिनेशः रसालः "सन्तवाङ्मये भारतीयं मनोविज्ञानम्" इति विषये तथा बिंझाणी–महिला–महाविद्यालयस्य सहयोगिनी प्राध्यापिका डॉ.अमृता भुस्कुटे "भारतीयस्य मानसिकस्वास्थ्यस्य कृते पञ्चकोश–पुरुषार्थ–प्रारूपम्" इति विषये स्वस्व–शोधपत्रे प्रस्तोष्यतः। अस्य संवादसत्रस्य अध्यक्षता भारतीय–धर्म–दर्शन–संस्कृति–संकायस्य अधिष्ठाता प्रो. कलापिनी अगस्ती करिष्यति।अस्यां संगोष्ठ्यां विभिन्नसंस्थाभ्यः आगताः पञ्चसप्ततिः (७५) शोधकर्तारः स्वस्व–शोधपत्राणि प्रस्तोष्यन्ति।

# कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य आन्तरिक -उपालम्भ-निवारण-समित्या महिला-प्रकोष्ठेन च रक्तदान-शिविरस्य आयोजनम्



**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे नागपुरम्।** कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयस्य, रामटेक–नगरे स्थितस्य, तत्त्वावधानात् महिला–प्रकोष्ठस्य राष्ट्रीय–सेवा–योजनायाश्च संयुक्तप्रयासेन गुरुवासरे एकं भव्यं रक्तदान–शिविरम् आयोजितम्। एतत् शिविरं नागपुर–नगरे स्थितायाः डॉ.हेडगेवार–रक्तपेढ्याः सहयोगेनसफलतया सम्पन्नम्। कार्यक्रमस्य अध्यक्षतां विश्वविद्यालयस्य प्रभारी–कुलसचिवः डॉ.रोशनः अलोने अकरोत्।स्वीयोद्बोधने तेन उक्तं यत् रक्तदानं सामाजिक–उत्तरदायित्वस्य एकं अत्यन्तं महत्त्वपूर्णं कार्यम् अस्ति। कार्यक्रमस्य विशेषातिथिरूपेण डॉ.हेडगेवार–रक्तपेढ्याः, नागपुर–नगरे स्थितायाः, चिकित्साधिकारी डॉ.शेरील् पडोळे उपस्थिताभूत्। आन्तरिक–शिकायत–निवारण–समितेः (ICC) अध्यक्षा प्रो. राजश्री मेश्राम प्रस्तावनां प्रस्तुत्य अवदत् यत् विश्वविद्यालये वर्षपर्यन्तं विविधकार्यक्रमाः आयोज्यन्ते, तस्मादेव अस्मिन् अवसरे रक्तदान–शिविरस्य आयोजनं कृतम्। सा रक्तदानस्य महत्त्वं रेखाङ्कयन्ती तत् श्रेष्ठं दानम् इति वर्णितवती।विशेषातिथिः डॉ.शेरील् पडोळे रक्तदानस्य महत्त्वं तस्य लाभांश्चविस्तरेण प्रकाशयामास। सा अवदत् यत् रक्तस्य त्रयः अंशाः पृथक्–पृथक् कृत्वा विभिन्नेषु रोगिषु दातुं शक्यन्ते, येन एकस्य व्यक्तेः रक्तदानेन त्रयाणां जनानां जीवनरक्षणं सम्भवति।अस्मिन् अवसरे डॉ.हरेकृष्णः अगस्ती (परिसर–निदेशकः), डॉ.जयवन्तः चौधरी (निदेशकः, राष्ट्रीय–सेवा–योजना), डॉ.कृष्णकुमारः पाण्डेयः (निदेशकः, वारङ्गा–परिसरः), तथा डॉ.राजश्री मेश्राम (अध्यक्षा, महिला–प्रकोष्ठः एवं ICC–समितिः) इत्यादयः अन्ये च गणमान्यजनाः मञ्चे उपस्थिताः आसन्।कार्यक्रमस्य सञ्चालनं सहायक–कुलसचिवा सुश्री कल्याणी देशकर अकरोत्। अस्मिन् शिविरे बहवः जनाः सहभागं कृतवन्तः, विशेषतया महिला–छात्राः प्राध्यापकाः च उत्साहपूर्वकं सहभागितां दर्शितवन्तः। समग्रतया द्विचत्वारिंशत् (४२) जनाः रक्तदानं कृतवन्तः, येषु महिलानां संख्या अधिका आसीत्।शिविरस्य सफलतायां व्यवस्थायां डॉ.हेडगेवार–रक्तपेढ्याः डॉ.मोहनः गोखले तेषां सम्पूर्णं च दलं महत्त्वपूर्णं योगदानं कृतवती। विश्वविद्यालयस्य डॉ.शुभाङ्गी मून, श्री आदित्यः शुक्लः, नलिनी इङ्ळे, श्री मोरे, तथा अन्याः महिला–छात्राः कर्मचारीगणाश्च आयोजने विशेषं सहयोगं कृतवन्तः। रक्तदानं कृतवद्भ्यः सर्वेभ्यः सहभागिभ्यः प्रमाणपत्राणि प्रदत्तानि। कार्यक्रमस्य अन्ते छात्र–कल्याण–निदेशकः डॉ.जयवन्तः चौधरीकार्यक्रमस्य सफलतायै सर्वेषां प्रति आभारं प्रकटितवान्।

# अखिलभारतीयान्तः-क्षेत्रीयायां महिला-कबड्डी - क्रीडाप्रतियोगितायां कविकुलगुरु-कालिदास- संस्कृत- विश्वविद्यालयस्य महिला-दलस्य उत्कृष्टं प्रदर्शनम्



हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे।अखिलभारतीय–विश्वविद्यालय–संघेन, नवी–दिल्ली–नगरे स्थितेन, हिमाचल–प्रदेशस्य धर्मशालायां स्थिते केन्द्रीय–विश्वविद्यालये दिनाङ्केभ्यः ९ फेब्रुवरीतः १२ फेब्रुवरी २०२६ पर्यन्तम् अखिलभारतीयान्तर्क्षेत्रीयाः क्रीडाप्रतियोगिताः आयोजिता। अस्यां प्रतियोगितायां देशस्य विभिन्नविश्वविद्यालयेभ्यः आगतानि षोडश (१६) दलानि सहभागं कृतवन्तः। अखिलभारतीयान्तः–क्षेत्रीयायां महिला–कबड्डी–क्रीडाप्रतियोगितायां कविकुलगुरु–कालिदास– संस्कृत–विश्वविद्यालयस्य महिला–दलेन सम्पूर्णे भारते पञ्चमं स्थानं प्राप्तम्। अनेन उत्कृष्टप्रदर्शनेन सह दलस्य "खेलो इण्डिया" क्रीडाप्रतियोगितायै पात्रता अपि प्राप्ता अस्ति। अस्याः सफलतायाः कृते क्रीडा–निदेशकः डॉ.हृषीकेशः दलैः, प्रो. सन्तोषः कोल्हे तथा बालासाहेबः सवडे इत्येतेषां मार्गदर्शनं प्राप्तम्। माननीयः कुलगुरुः डॉ.अतुल वैद्यः
विजयीं दलं अभिनन्द्य आगामिन्यः राष्ट्रिय–क्रीडाप्रतियोगिताः प्रतिहार्दिकाः शुभाशयाः प्रदत्तवान्।




# "लौकिकन्यायकोशः"

## "श्मशानवैराग्यन्यायः"

भारतीयसंप्रदायानुसारं मृतशरीरस्य अग्निसंस्कारः क्रियते खलु। श्मशाने शरीरे दह्यमाने तत्र स्थितानां मनसि का वा भावना उत्पद्येत? ते चित्तयेयुः- कियत् इदं क्षणभङ्गुरं जन्म! सर्वेषाम् अपि अन्तिमं गम्यं श्मशानम् एव खलु इति। एतादृश्यः भावनाः सर्वेषां मनःसु भवन्ति। परन्तु श्मशानं त्यक्त्वा गृहं यदा गच्छन्ति तदा सर्व वैराग्यं नश्यति पुनश्च लोकभावना जागर्ति। एवं काश्चन भावनाः अस्थिररूपेण जायन्ते नश्यन्ति च इति भावः। यथा-

{१}
**प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः।**
**संन्यासिनोऽपि दृश्यन्ते देवसन्दूषिताशयाः।।**
{२}
**श्मशानान्ते पुराणान्ते मैथुनान्ते च या मतिः।**
**सा मतिः सर्वदा काले नरो नारायणो भवेत्।।**
(हितोपदेशमित्रलाभे ६८-१६४)

**डा. वर्षा प्रकाश टोणगांवकर पुणे, महाराष्ट्रम्**

# आधुनिकभारतदेशस्य निर्माणे स्वामीदयानन्दस्य योगदानम्




**डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी भागलपुर**

**(जयन्तीविशेषः)**

भारतीयेतिहासे उनविंशतिशताब्दी सामाजिकधार्मिकराजनीतिकदृष्ट्या संक्रमणकालः आसीत्। अस्मिन् काले भारतदेशे यत्र पाश्चात्यसत्ता देशस्य राजनैतिकस्वतन्त्रता हृतवती, तत्र एव समाजे अन्धविश्वासाः, रूढिवादः, जातिभेदः, नारी-अवमानना, अशिक्षा च गम्भीररूपेण व्याप्ताः आसन्। अस्मिन् अन्धकारपूर्णे काले यः महापुरुषः दीपशिखेव प्रज्वलितः अभवत्, एषः एव आसीत् स्वामीदयानन्दसरस्वती । एषः केवलं धार्मिकसुधारकः नासीत्, अपि तु आधुनिकभारतस्य बौद्धिक-सांस्कृतिक-राष्ट्रवादीनिर्माणस्य मूलस्तम्भः आसीत्। एतस्य विचाराः, संस्थाः, आन्दोलनानि च आधुनिकभारतस्य स्वरूपनिर्माणे निर्णायकभूमिकां निर्वहन्ति।स्वामीदयानन्दसरस्वती 1824 तमे वर्षे फरवरीमासस्य द्वादशदिनांके गुजरातप्रदेशस्य टंकारानाम्नि ग्रामे जन्म अलभत। बाल्ये एतस्य मूलशङ्करः आसीत्। बाल्यकालादेव एषः तीव्रबुद्धिः, सत्यजिज्ञासुः, धर्मचिन्तकश्च आसीत्। शिवरात्रौ मूर्तिपूजायाः व्यर्थतां दृष्ट्वा एतस्य मनसि ईश्वरस्वरूपविषये गम्भीरः प्रश्नः उत्पन्नः, येन एषः सत्यस्य अन्वेषणे गृहत्यागं कृत्वा संन्यासमार्गं स्वीकृतवान्। दीर्घकालं यावत् देशभ्रमणं कृत्वा स्वामी विरजानन्दसरस्वतीं गुरुत्वेन स्वीकृत्य वेदानां गहनाध्ययनं कृतवान्। गुरोः आदेशः— "वेदानां प्रचारं कुरु, असत्यस्य खण्डनं कुरु" स्वामीदयानन्दस्य जीवनव्रतं अभवत्। आधुनिकभारतस्य निर्माणं केवलं राजनैतिकस्वातन्त्रतायां न सीमितम्, अपि तु वैचारिकस्वातन्त्रतायाम् अपि निहितम् आसीत्।स्वामीदयानन्दः भारतीयानां आत्मविश्वासं पुनः जागरूकं कृतवान्।
यदा पाश्चात्यविद्वांसः भारतदेशम् अन्धविश्वासप्रधानम् , अवैज्ञानिकं च कथयन्ति स्म, तदा स्वामीदयानन्दः वेदानां वैज्ञानिकं, तार्किकं, सार्वकालिकं च स्वरूपं प्रतिपादिवान्। एतस्य उद्घोषः— "वेदाः सर्वज्ञानमयाः सन्ति"— भारतीयानां मनसि आत्मगौरवबोधं उत्पादितवान्। एतत् वैचारिकजागरणमेव आधुनिकभारतस्य बौद्धिकाधारः अभवत्। स्वामीदयानन्देन प्रतिपादितः धर्मः न आडम्बरप्रधानः आसीत्, न च पलायनवादी। एषः कर्मप्रधानः, समाजोपयोगी, राष्ट्रहितैषी च आसीत्।
एषः उद्घोषितवान् मूर्तिपूजा वेदविरुद्धा अस्ति। अन्धविश्वासः मानवबुद्धेः शत्रुः अस्ति। सत्यं, विद्या, परोपकारः एव धर्मस्य मूलं विद्यते। एवं धर्मस्य शुद्धस्वरूपप्रतिपादनं कृत्वा एषः आधुनिकभारतस्य नैतिकाधारं सुदृढं कृतवान्।स्वामीदयानन्दः1875 तमे वर्षे मुम्बईनगरे आर्यसमाजस्य स्थापनां कृतवान्। आर्यसमाजः केवलं धार्मिकसंस्था नासीत्, अपि तु सामाजिक-शैक्षिक-राष्ट्रवादी आन्दोलनम् अपि आसीत्।आर्यसमाजस्य दशसिद्धान्ताः सत्य, विद्या, धर्मप्रचारः, सर्वेषां समानता,नारी-पुरुषयोः समानाधिकारः,समाजकल्याणम् एते सर्वे आधुनिकलोकतान्त्रिकमूल्यैः सह संगच्छन्ति। आर्यसमाजेन आधुनिकभारतस्य सामाजिकसंरचना पुनर्निर्मिता ।स्वामीदयानन्दः जातिव्यवस्थायाः जन्माधारितरूपस्य विरोधी आसीत्। एतस्य मतानुसारं—"गुणकर्मविभागशः वर्णव्यवस्था" जन्मना न, कर्मणा एव मनुष्यः ब्राह्मणः वा शूद्रः भवति। एषः विचारः आधुनिकभारतस्य सामाजिकन्यायसंकल्पनायाः मूलाधारः अभवत्। अस्पृश्यतानिवारणे, सामाजिकसमतायां, मानवाधिकारचिन्तने च एतस्य योगदानं अत्यन्तं महत्त्वपूर्णम् अस्ति।
यत्र स्त्रियः अविद्यायाः, आवरणप्रथायाः, बालविवाहस्य, विधवायाः दुःखस्य च बन्धनेषु बद्धाः आसन्, तत्र स्वामीदयानन्दः स्त्रीस्वातन्त्रतायाः निर्भीकः प्रवक्ता आसीत्।एषः स्त्रीशिक्षायाः प्रबलसमर्थकः आसीत्। एषः विधवाविवाहं समर्थितवान्। अयं "नारी पुरुषस्य समाना" इति उद्घोषितवान् । एते विचाराः आधुनिकभारतस्य नारीसशक्तीकरणस्य प्रारम्भबिन्दवः सन्ति।
स्वामीदयानन्दः शिक्षां राष्ट्रनिर्माणस्य प्रधानं साधनं मन्यते स्म। तस्य प्रेरणया एव गुरुकुलप्रणाली आधुनिकरूपे पुनर्जीविता अभवत्। सम्प्रति अपि डीएवीशिक्षणसंस्थाःवैदिकसंस्काराः,आधुनिकविज्ञानम्,राष्ट्रभक्तिः एतेषां समन्वयेन आधुनिकभारतीयशिक्षाप्रणालीं विकसितवन्तः।एषा शिक्षा न केवलं जीविकोपार्जनाय, अपि तु चरित्रनिर्माणाय अपि उपयुज्यते स्म।स्वामीदयानन्दः आधुनिकभारतस्य प्रथमः चिन्तकः यः स्वराज्यभावनां वैचारिकरूपेण प्रतिपादितवान्। सः परतन्त्रतां अधर्मं मन्यते स्म।एतस्य विचारान् लोकमान्यतिलकं,लाला लाजपतरायमहोदयं,स्वामी श्रद्धानन्दं,भगतसिंहं,इत्यादीन् राष्ट्रवादिनः प्रभावितवन्तः।अतः स्वामीदयानन्दः आधुनिकभारतीयराष्ट्रवादस्य बौद्धिकपितामहः इति कथ्यते।स्वामीदयानन्दकृतः सत्यार्थप्रकाशः आधुनिकभारतस्य सर्वाधिकः प्रभावशाली ग्रन्थेषु एकः अस्ति। अस्मिन् ग्रन्थे धर्मस्य वैज्ञानिकव्याख्या,सामाजिकदोषाणां निर्भीकखण्डनम्,परतन्त्रतायाः सूक्ष्मनिन्दा एते सर्वे विषयाः आधुनिकचिन्तनस्य आधारं निर्मान्ति। पाश्चात्यसंस्कृतेः अन्धानुकरणकाले स्वामीदयानन्दः भारतीयसंस्कृतेः गौरवं पुनः स्थापितवान्। एषः संस्कृतभाषायाः, वेदाध्ययनस्य, भारतीयपरम्परायाः पुनरुत्थानं कृत्वा आधुनिकभारतस्य सांस्कृतिकस्वाभिमानं सुदृढं कृतवान्। 1883 तमे वर्षे अक्टूबरमासस्य त्रिंशत् दिनांके स्वामीदयानन्दस्य विषसेवनकारणात् देहावसानम् अभवत्। किन्तु एतस्य विचाराः, दर्शनं, प्रेरणाः अद्यापि आधुनिकभारतस्य जनमानसे प्रवहन्ति। स्वामीदयानन्दसरस्वती आधुनिकभारतस्य निर्माणे अदृश्यशिल्पी इव आसीत्।एतस्य योगदानं वैचारिकजागरणे,सामाजिकसुधारे,शिक्षाविकासे,नारी-उत्थाने,राष्ट्रवादे च अद्वितीयम्, अमूल्यम्, अमरं च अस्ति।यदि आधुनिकभारतदेशः वैदिकमूल्यैः सह वैज्ञानिकदृष्ट्या, सामाजिकन्यायेन, राष्ट्रभक्त्या च संयुक्तं दृश्यते, तत्र स्वामीदयानन्दसरस्वत्याः योगदानम् अवश्यम् एव स्मरणीयं विद्यते। अन्ते च वयं वक्तुं शक्नुमः यत् "स्वामीदयानन्दः न केवलं युगपुरुषः, अपि तु युगनिर्माता आसीत्।" इत्यलम्।

# दशदिनात्मकयोगप्रशिक्षण कार्यशालायाःशुभारम्भः,सोनमरावत-प्रशिक्षिका शिक्षयति योगम्




हिमसंस्कृतवार्ता। कण्वनगरीकोटद्वारस्य शिवराजपुर-मोटाढाङ्गस्थिते मालिनी-वैली-कॉलेज्-ऑफ्-एजुकेशन इत्यस्मिन् शिक्षणसंस्थाने दशदिनात्मकयोगप्रशिक्षण-कार्यशालायाः मंगलमयः शुभारम्भः विधिवद् सञ्जातः । अस्याः कार्यशालायाः उद्घाटनसमये महाविद्यालयनिदेशकः आदरणीयः श्रीयोगम्बर-सिंह-रावतमहोदयः, रा० इ० कॉलेज-कोटद्वार इत्यस्य संस्कृतशिक्षकः श्रीकुलदीप-मैन्दोला-महोदयः, सेवानिवृत्तप्रधानाचार्यः डॉ० रमाकान्त-कुकरेती-महोदयः तथा सार्थकयोगकार्यशालायाः योगप्रशिक्षिका कुमारी सोनम-रावत-महोदया च संयुक्ततया दीपप्रज्वलनं कृत्वा कार्यक्रमस्य शुभारम्भम् अकुर्वन्। अस्मिन् उद्घाटनसमारोहे महाविद्यालयस्य मार्गदर्शकाः प्रशिक्षणार्थिनः छात्राः, प्राध्यापकाः, कर्मचारिणः तथा योगाभिलाषिणः बहुसंख्यया उपस्थिताः आसन्। कार्यक्रमस्य प्रारम्भे वेदमन्त्रपाठेन वातावरणं आध्यात्मिकभावेन पूर्णम् अभवत्। उद्घाटनसमये वक्तृभिः योगस्य महत्त्वं विस्तरेण प्रतिपादितम्। श्रीयोगम्बर-सिंह-महोदयः स्वयं योगयुक्तः सन् सर्वेषां मनोबलं वर्धयन् घण्टाद्वयस्य यौगिकसहयोगं स्वास्थ्यवर्धनाय प्रददाति। श्रीकुलदीप-मैन्दोला-महोदयेन छात्रान् प्रति प्रेरणादायी संदेशः दत्तः यत् नियमितयोगाभ्यासेन अनुशासनबुद्धिः, एकाग्रता, स्वास्थ्यलाभः च भवति, योगद्वारा मनोदैहिक नियन्त्रणं सम्भवति। सः उक्तवान् यत् संस्कृतभारतीद्वारा एवं सार्थकयोगशालाद्वारा मालिनीवैलीकालेज आफ एजुकेशन इत्यत्र त्रयाणां संयुक्तसहयोगेन कण्वनगर्यां योगस्य कार्यशाला संजायते । डॉ० रमाकान्त-कुकरेती-महोदयेन उक्तं यत् प्रतिदिनमेव ध्यानाभ्यासेन मानसिकशान्तिः प्राप्यते। तदेव जीवनस्य आधारः वर्तते। योगप्रशिक्षिका कु० सोनम-रावत-महोदया अवदत् यत् अस्यां कार्यशालायां ताडासनम्, त्रिकोणासनम्, भुजङ्गासनम्, पवनमुक्तासनम्, वज्रासनम् , सूर्य-नमस्कारः इत्यादीनि आसनानि, अनुलोम-विलोमः, कपालभातिः, भ्रामरी इत्यादयः प्राणायामाः, ध्यानप्रक्रिया च अध्याप्यन्ते। सा अवदत् यत् नियमिताभ्यासेन न केवलं रोगप्रतिरोधकशक्तिः वर्धते, अपितु चिन्ता अपि न्यूनो भवति।एषा दशदिनात्मकयोगकार्यशाला दिनाङ्क ११-०२-२०२६ तः २०-०२-२०२६ पर्यन्तं प्रतिदिनं प्रातः ९:३० वादनात् अपराह्न १२:०० वादनपर्यन्तं आयोजिता अस्ति। महाविद्यालयस्य प्रबन्धिका श्रीमती श्वेता-रावत-महोदया योगं स्वस्थजीवनस्य आधारस्तम्भं निर्दिश्य क्षेत्रवासिनः आहूतवन्ती यत्— " योगः एव संतुलितजीवनस्य श्रेष्ठः उपायः इति । अनेन प्रकारेण अस्याः दशदिनात्मकयोगप्रशिक्षणकार्यशालायाः शुभारम्भः उत्साहपूर्णवातावरणे संजायते, यः न केवलं छात्राणाम् अपितु समग्रक्षेत्रस्य स्वास्थ्यवर्धनाय मङ्गलसूचकः वर्तते।